**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 9, Sept - 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Received on : 15/09/2021 Accepted on : 25/09/2021 Publication Date: 30/09/2021

# शब्दलिङ्गार्थचन्द्रिकाख्यायाः मातृकायाः पर्यालोचनात्मकम् अध्ययनम्

**Dr. Srikanta Parida**
Assistant Professor, Department of Languages, Amrita Vishwa Vidyapeetham, Mysuru Campus, Mysuru, India
Email – srikant.parida12@gmail.com ,

**पीठिका :** वेदादारभ्य समग्रसाहित्यसमुदायस्य सुरक्षार्थं वित्तकोषाणामिव शब्दकोशानामपि रक्षाकरणार्थं उद्यमकर्तव्यम्। नाम नानार्थक-पर्यायवाचिकोशग्रन्थः श्रीमता सुजनभट्टेन प्रतिभाशालिना कवीश्वरेण निरमायि। शब्दलिङ्गार्थचन्द्रिकाकोशः सम्प्रति लोके प्रचारशैथिल्येन अकालमृत्युम् उपयाति इत्यहमस्य रक्षणे परिकरं बध्नामि। अयं ग्रन्थस्तु अप्रकाशितः। अपि तु मातृकारूपेण मातृकागारे संरक्षितः। मातृकागारे केवलम् मातृकारूपेण स्थितानां बहुमूल्यग्रन्थानां परिप्रकाशार्थं तथा शब्दकोशानामपि रक्षाकरणार्थं मया उपलब्धमातृकाणाम् आधारेण शोधपत्रम् लिखितः।

**बीजाक्षराणि :** शब्दलिङ्गार्थचन्द्रिका, सुजनभट्टः, कोशग्रन्थः, शब्दलिङ्गार्थचन्द्रिका मातृका ।

## 1. प्रस्थावना :

श्री सुजनभट्टः कृत शब्दलिङ्गार्थचन्द्रिकाकोशग्रन्थः एकः सरल सुबोध्य व्यवहारोपयोगीशब्दानां समूहात्मकः समृद्धग्रन्थो अस्ति। अस्मिन् कोशग्रन्थे शब्दानां लिङ्गाध्ययनविधि नानार्थकशब्दानां प्रचलितार्थानां वर्णक्रमानुसारेण सविस्तरं विवरणं वरीवर्ति । प्रायः अनुष्टुप् छन्दसि अस्य निर्माणम् जातम्। अयं कोशः शब्दस्य लिङ्गभेदेन भिन्नभिन्न रूपाणां समानार्थकशब्दानां तस्यार्थानां उल्लेखं करोति। कोशेऽस्मिन् एकलिङ्गै-द्विलिङ्गै-त्रिलिङ्ग इति त्रिणिकाण्डान्युपलभ्यन्ते। एकलिङ्गिकाण्डे एकलिङ्गिशब्दानां तस्य पर्यायवाचि शव्दानां च संङ्कलनमस्ति। द्वितीयकाण्डे द्विलिङ्गिकाण्डे वा उभयलिङ्गिशब्दानां संग्रहः तावदुपलभ्यते। त्रिलिङ्गिकाण्डे त्रिषु लिङ्गेषु विद्यमानां प्रयुज्यमानां शब्दानां सङ्कलनं गर्भीकृतं विद्यते। कोशेऽस्मिन् पुं-नपुं-स्त्री-अस्त्री-क्लीबादि शब्दानां प्रयोगं कृत्वा संस्कृतनामलिङ्गप्रदर्शनार्थं कोशग्रन्थः विराजते।

## 2. विषयः

शब्दलिङ्गार्थचन्द्रिका इति कोशग्रन्थस्य एकादशमातृका उपलभ्यन्ते इति मातृकासंग्रहालयेभ्यः प्रकाशितानां विवरणात्मकग्रन्थसूचीनां (NCC) अवलोकनेन ज्ञायते। ते यथा- Adyar. D. VI. 1017-18, Andhra Univ. 993. 2430., GOML. 93. MD. 1759-61. 1961, S.V. Uni. I. 1061, VORI. Tirupati 6489. चेन्नै-नगरीयसर्वकारीय हस्तलिपिमातृकाग्रन्थालये (GOML) 93, MD 1759, 1760, 1761, 1961 इति पञ्च मातृका उपलभ्यन्ते इति दर्शितम्। परन्तु एतेषु पञ्चसु मातृकासु 93, MD. 1759, 1961 इति मातृकाद्वयं ग्रन्थालये नोपलब्धम्। अडयार् मातुकाग्रन्थालये D. VI. 1017-18 इति मातृकाद्वयं उपलब्धम्। श्री वेङ्कटेश्वर विश्वविद्यालये (S.V. Uni. Tirupati) I. 7466(d) इति उपलभ्यमातृका प्राप्यते। एतेषु मातृकासु आन्द्र विश्वविद्यालये स्थिता मातृका Andhra Univ. 993. 2430 तथा VORI Tirupati 6489 इति मातृकात्रयं नैव उपलभ्यते।

एतासु निर्दिष्टामातृकासु उपलब्धाः पञ्चमातृकाः यथा- GOML. 1760. 1761, Adyar D.VI. 1017-18, S.V. Uni. 7466(d) इति मया अत्र शोधकार्ये स्वीकृता। शोधकर्मणि स्वीकृतपञ्चमातृकासु केवलं एका (Adyar. D.VI. 1018) एव देवनागरी लिप्यां कर्गजपत्रे लिखिता वर्तते। अन्या चतस्रः मातृकाः (GOML. 1760. 1761, Adyar D.VI. 1017, S.V. Uni. 7466(d)) तेलुगुलिप्यां तालपत्रे लिखिताः। सर्वाः मातृकाः संपूर्णाः सन्ति।

## 3. उपलभ्यमानाः संगृहिताश्च शब्दलिङ्गार्थचन्द्रिकामातृकाः -

| Sl. No | Place | Mss No | Siglum | Substance | Scripts | Extant Folios | Condition | Remarks |
|---|---|---|---|---|---|---|---|---|
| 1 | Adyar Library and Research Center | 1017 | A | Palm Leaf | Telugu | 23 | Slightly Injured | Complete |
| 2 | Adyar Library and Research Center | 1018 | AD | Paper | Devanagari | 107 | Good | Complete |
| 3 | GOML | 1761 | G1 | Palm Leaf | Telugu | 37 | Good | Complete |
| 4 | GOML | 1760 | G2 | Palm Leaf | Telugu | 23 | Good | Complete |
| 5 | S.V. Uni | 7766 (d) | SV | Palm Leaf | Telugu | 14 | Good | Complete |

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 9, Sept - 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Received on : 15/09/2021 Accepted on : 25/09/2021 Publication Date: 30/09/2021

## 4. संगृहिता मातृकावंशावली -

उपलभ्यमानानां पञ्चमातृकाणां अध्ययनेन तेषां वंशावली ज्ञानम् भवति। मातृकाणां वंशावली परिकल्पनावसरे काचित् विषयाः परिगणितव्याः। यं यं विषयमाधारीकृत्य मातृकावंशावली मया निर्मिता ते विषयाः अत्र आलोचिता।

प्रत्येकं मातृका हस्तप्रतिकृतिपरम्पराक्रमेण प्राप्ता इतिहेतोः सा विशिष्टा लक्षणान्विता भवति। अतः प्रत्यैकं मातृका तैः तैः स्वलक्षणैः अभिज्ञातुं सक्या। अतः मातृकावंशावली निर्माणावसरे तानि लक्षणानि सम्यक् ज्ञातव्यानि। तानि लक्षणानि यथा- समानस्थाने अक्षराणांलोपः, समानस्थाने अक्षराणां योजनम्, समानस्थाने ग्रन्थप्रक्षेपः अथवा कथानकप्रक्षेपः, पद्यानां श्लोकानां वा समानरूपः क्रमव्यक्तयः। लिपिमाश्रित्य वंशावली न रचनिया। यतः प्राचीनकाले लिप्यान्तरिकरणम् बहुत्र प्रचलत्, परम्परायाः मिश्रणमपि सम्भव्यते। मातृकोपलब्धिस्थानमपि आश्रित्य वंशावली रचयीतुं न सक्यात्। यदि नाना मातृकाणां परिशिलनेन समानस्थानेषु कीटः दंसनहेतुकः लोपाः ग्रन्थपाताः वा दृष्टिगता भवन्ति तर्हि ता सर्वा मातृका समानपरिवारीया मातृका ज्ञातव्याः। यदि मातृकासु समानस्थाने दुरुहाणिपदानि अवोद्धानि अक्षराणि निरर्थकानि च पदानि अवलोक्यन्ते तर्हि ता मातृका समानपरिवारीया इति ज्ञेयाः।

शब्दलिङ्गार्थचन्द्रिकायाः वंशावली निर्माणे आदौ मूलमातृका यत् कोशकारः सुजनभट्टेन लिखितं तत् Ur Text इति सङ्केताक्षरैः सूचीता। मूलमातृकायाः प्रतिकृतीनां परम्पराद्वये विभागं कृत्वा X, Y इति सङ्केताक्षरैः सूचीता। उपलभ्यमानानां पञ्चमातृकाणां परिशीलनेन ज्ञातव्यं यत् –

- A, G1 मातृकाद्वयं एकमातृकापरिवारं भवति समानस्थाने अक्षरलोपत्वात्। यथा - "आलीद्रुणे" – 'रालीxणे A, AD, G1'। "किञ्जल्कं" इति शब्दस्य समानस्थाने लोपत्वात् ' किञ्जल्कं - xxx A, G1'।
- कर्गजपत्रे विद्यमाना देवनागरीलिपि मातृका (AD) A मातृका वंशपरम्परायां आगच्छति। AD मातृका A मातृकायाः प्रतिकृतिरस्ति। कारणं तावत् – A मातृकायां यत्र यत्र कीटदग्ध भग्नपाठश्चास्ति AD मातृकायां तत्र तत्र वर्णानां लोपः दृश्यते। यथा– शब्दलिङ्गार्थचन्द्रिकायाः प्रथमकाण्डस्य द्वादशतम श्लोके "लोचकस्तारकायां स्याल्लोचनस्यांजने भ्रुवि" इति। अत्र A मातृकायां 'स्याल्लोचनस्यांजने' इति शब्दस्य 'जने' इति वर्णद्वयं भग्नपाठम्। AD मातृकायां 'जने' इति समानस्थाने वर्णलोप दृश्यते। उभयोः मातृकयोः समानस्थाने वर्णलोपः अपि विद्यते। यथा- "मघाभेषजभेदे स्याद्भेदे चापि भाषितौ" इति पद्यांश कोशग्रन्थस्य प्रथमकाण्डस्य ५९ तम श्लोके 'मघाभेषजभेदे' इति शब्दे A मातृकायां 'मघाXXXभेदे, AD मातृकायां मघाXXXभेदे' इति उभयोः मातृकयोः समानस्थाने वर्णलोपः विद्यते। AD मातृका तालपत्रे तेलुगुलिप्यां लिखिता A मातृकायाः प्रतिकृतिरस्ति।
- मातृकासु कुत्रचित् A, G1, G2 इति मातृकाणां मध्ये सादृश्यं अनुमीयते। यथा- "परिवेषश्चन्द्रसूर्य°" इति शब्दे 'ष' इत्यस्य लोपः A, G1, G2 इति त्रिषु मातृकासु विद्यते। परन्तु कदाचित् G2 मातृका A, G1 मातृकाभ्याम् सामान्यभिन्ना परिलक्ष्यते यथा- सस्तुनि - सस्तुनि A, G1, सक्तुःx -G2।
- SV इति मातृका A, AD, G1, G2 इति मातृकासु पूर्णतया भिन्ना।

शब्दलिङ्गार्थचन्द्रिकाकोशग्रन्थादौ पाठम् वर्तते यथा-

देदीप्यमानौ देव्यास्तु देयास्तौ चरणौ शुभम्।
कञ्जकिञ्जल्कपुञ्जाभमञ्जुमंजीररंजितौ ॥

ग्रन्थस्यान्ते पाठम् एवम् अस्ति - "इति श्रीमदनवद्य-विद्याहृद्याखण्डपाण्डित्यमण्डित-पण्डितमण्डलविकट-पटुतरकिरीटपटल-तटपटुघटितमरकतमुखमणि-गणघटनसन्दीप्यमानारुण-चरणनखेन शश्वदमन्दानन्दसंदो-हकन्दलीकृतहृदयारविन्दसभेन समस्तविपक्ष-पक्षदक्षप्रशस्तमस्तकविन्यस्तवामपादेन सकलदर्शनाप्रतिद्व-न्द्वभूतवादेन सर्वदानन्दितसुजनेन विरचितायां निखिल कोशसाररूप विरचितायामखिल-सरससान्द्रिकायां शब्दलिङ्गार्थचन्द्रिकायां सर्वलिङ्गकाण्डः स्संपूर्णः"।

## 5. मातृकायां लेखदोषाः उदाहरणानि च -

- अक्षरसंभ्रन वर्णपदभ्रान्तिश्च – बहुत्र 'स' स्थाने 'न' इति दृश्यते। यथा- 'सरस्यपि' इति लेखे 'नरस्यपि इति A, AD' मातृकायां लिखितम्। 'सटायां' इति स्थाने 'नटायां' इति A, AD, G1, SV मातृकायां लिखितम्। 'हेमवेतसयोर्मर्म' इति लेखे हेमवेतनियोर्भर्म A, हेमवेतनियोर्भर्म G1, हेमवेतनियोर्धर्म G2, हेमवेतनयोर्भर्म SV इति लिखितम्। 'कर्मण्यासवे' इति स्थाने 'कर्मण्यानवे' इति SV मातृकायां दृष्टम्। बहुत्र 'ब' इति वर्णस्थाने 'व' इति लिखितम्। यथ- 'कुबेरवाहने' इति स्थाने 'कुवेरवाहने' इति G1 मातृकायां लिखितम् । अपि च 'र' स्थाने 'ल' वर्णस्य प्रयोगः बहुषु स्थलेषु दृश्यते। यथा- 'शरे' इत्यत्र 'शले' इति लेख A, AD, G1, G2 मातृकासु विद्यन्ते। सर्वेषु मातृकासु 'थ' वर्ण 'ध' वर्णयोर्मध्ये भेदः नैवदृश्यते। कुत्रचित् 'छ' वर्णस्थाने 'भ' इत्यस्य प्रयोग। यथा- 'छेदनं' इत्यत्र स्थले 'भेदनं' इति AD मातृकायां प्रयोगः। मातृकासु 'न' वर्णस्थाने 'ण' वर्णस्य 'ण' वर्णस्थाने 'न' वर्णस्य प्रयोग अपि लभ्यते।
- पदव्यत्ययः – 'श्रीसुजन' इत्यत्र 'सुश्रीजन SV 'इति पाठः। 'चापि' इत्यत्र 'पिच' इति SV मातृकायां पाठः। 'प्रपातयोः' इति स्थाने 'प्रतापयोः' इति SV मातृकायां पाठः। कुत्रचित् मातृकासु पादव्यत्ययः अपि परिदृश्यते। यथा- "शुष्काटव्यां तु कक्षः स्यात्कक्ष्या कक्षश्च

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 9, Sept - 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Received on : 15/09/2021 Accepted on : 25/09/2021 Publication Date: 30/09/2021

दोरदः। तत्तत्प्रसङ्गसमये दूषणादौ स्त्रियां मता" इति A, AD, G1, G2 मातृकासु विद्यन्ते परन्तु SV मातृकयां "तत्तत्प्रसङ्गसमये दूषणादौ स्त्रियां मता। शुष्काटव्यां तु कक्षः स्यात्कक्ष्या कक्षश्च दोरदः" इति लिखितम्।

• मात्रादोषः – 'ध्रुवे' इति लिखितव्ये 'धृवे' इति। 'कर्णिका' इति लिखितव्ये 'कर्णका' SV मातृकायाम्। 'कोपसहिता' इत्यत्र 'कोपसहित' इति A, AD, G1, G2 मातृकासु प्राप्यते। 'निर्मुक्षं' इति स्थाने 'निर्मोक्ष A, AD, G2, निर्मोक्षं G1, निर्मोषे SV' इति पाठः। 'भुजः' इति स्थाने 'भोज' इति A, G1, G2, SV मातृकासु लिखिता। बहुत्र ह्रस्वमात्रास्थाने दीर्घमात्रायाः, दीर्घमात्रास्थाने ह्रस्वमात्रा प्रयोग दृश्यते। यथा- 'घण्टाशब्दोभिधीयते' इति स्थाने 'घण्टाशब्दोभिधियते' इति G1 मातृकायां लिखितम्।

• अल्पप्राण-महाप्राणाक्षरव्यत्ययः –'शाकभेदे' इति स्थाने 'शाखभेदे' इति लिखितम्। 'देवखातबिले' इति स्थाने'देवघातबिले'इति लिखितम्।

• अस्थाने वर्णस्य द्विः निर्देशः – 'चञ्चु' इति स्थाने 'च्चञ्चु' इति G1, SV मातृकायां लिखितम्।

• पाठसाम्यहेतुना शब्दानां अक्षराणां साम्येन श्लोकादीनां लोपो भवति।

• लिपीनामज्ञानेन संख्याक्षराणामज्ञानेन संख्याशब्देष्वशुद्धलेखनं भवति।

## 6. निष्कर्षः

अप्रकाशितानां ग्रन्थानां स्थितिः केवलं पुस्तकशालासु असूर्यंपश्यावस्था वर्तते। तेषां क्रमशः प्रकाशनं अध्ययनञ्च, तेषां सुरक्षार्थं तेषां वैशिष्ट्यज्ञानार्थं अवश्यं कर्तव्यं इति मत्वा मया शब्दलिङ्गार्थचन्द्रिकामातृकायाः अध्ययनञ्च पञ्चमातृकाधारेण विहितम्। बहुत्र कीटदग्धानां तालपत्राणां पुटेषु यद्यपि इतस्ततः पाठः लुप्तः सन्दिग्धः च भवतः तथापि अन्यतालपत्राश्रयेण तेषां स्थितिर्निं सुदृढं कर्तुं शक्यमासीत् इति मदीयप्रयत्नेन अवगतम्।

**संदर्भ ग्रन्थ सूची :**

1. Das, Dr. Srinirudha (1978), New Catalogus Catalogorum. Vol- xxxiii University of Madras. Chennai.
2. H. G. Narahari (1943), The Sabdalingarthachandrika of Sujana, Vol.XII, The Adyar Library Bulletin, Adyar, Chennai.
3. Krishnamacharya, V. (1947), Descriptive Catalogue on Sanskrit Manuscripts. Vol. VI, Adyar Library and Research Center, Adyar,
4. Kupapuswamisastri S., A Descriptive catalog of the Sanskrit manuscript, Government Oriental Manuscript Library, Chennai.
5. Murti, Dr. P. Srirama (1972), Contribution of Andhra to Sanskrit Literature, Andhra University.
6. Patkar, M.M. (1981), History of Sanskrit Lexicography. Munshiram Manoharlal Publishers Pvt. Ltd., Delhi.
7. Taylor, Rev. William (1860), Oriental Manuscripts in the Government Library, Vol. II, Madras.

REFERENCES: ( APA / MLA style)

**About the Author:**

Dr. Srikanta Parida is currently serves as Assistant Professor in Amrita Darshanam (International Centre for Spiritual Studies), Amrita School of Arts and Sciences, Amrita Vishwa Vidyapeetham, Mysore campus, Karnataka, India. He has more than 1 year of teaching experience with 3 years of research experience. He has presented and published number of research paper in National and International Journals and Conferences. His areas of interest are Sanskrit Literature, Lexicography, Veda, Manuscriptology, Yoga and IndianPhilosophy.

